# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-२ (SEM-3) | प्रश्नपत्र-८ | गुणा: - ७० |
| विषय:- वास्तुशास्त्रम् | CE236 | समय: - ०३ त: ०६ |
| दिनाङ्क: - ०२/१२/२०१६ | सन्दर्भग्रन्थ: -वास्तुशास्त्रविमर्श: | |

॥ प्रथमान्विति: ॥

**प्र-१ अधोलिखितेभ्य: कयोश्चित् श्लोकद्वयो: ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. स्त्रीपुत्रादिकभोगसौख्यजननं धर्मार्थकामप्रदं जन्तूनामयनं सुखास्पदमिदं शीताम्बुधर्मापहम् ।
वापी देवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते गेहं पूर्वमुशन्ति तेन विबुधा: श्रीविश्वकर्मादय: ॥

२. प्रासादे भवने तडागखनने कूपे च वाप्यां वने  जीर्णोद्धारपुरेषु यागभवने प्रारम्भनिर्वर्तने ।
वास्तो: पूजनकं सुखाय कथितं पूजां विना हानये पादौ रक्षसिकं शिवोंघ्रिकरयो: सन्धिश्च कोणद्वये ॥

३. आदित्यचन्द्रौ कुजराहुजीवा: शनिर्बुध: केतुभृगूसमेशा ।
रसोथ काष्ठागगजेन्दुकाष्टि नवेन्दुसप्तेन्दुनगा नखाश्च ॥

**प्र-२ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं लिखतु ।** ०८

१. गृहनिर्माणे पिण्डविचार: ।

२. पुराणेषु वास्तुशास्त्रदृष्ट्या गृहनगरनिर्माणयोजना ।

**प्र-३ अधोलिखितेषु कयोश्चित् द्वयो: टिप्पणीं लिखतु ।** ०४

१. वास्तुशास्त्रस्य उद्भव: विकासश्च ।
२. वास्तुपुरुषोत्पत्तिविषय: ।
३. गृहनिर्माणे मासविचार: ।
४. वासयोग्यभूमि: ।

**प्र-४ अधोलिखितेषु केषाञ्चित् पञ्चप्रश्नानामतिलघूत्तरं लिखतु ।** ०५

१. वास्तुशास्त्रस्य जन्म कदा अभवत् ?
२. प्रथम: स्थपति: क: ?
३. पुरुषार्था: कति विधा: सन्ति ?
४. वास्तुशास्त्रप्रमाणेन गृहनिर्माणं क्रियते तदा फलं किम् ?
५. शल्यशब्दस्य कोऽर्थ: ?
६. शिल्पशास्त्रस्य विकसितरूपशास्त्रं किम् ?
७. क: नगरी स्वर्गादपि गरीयसी वर्तते ?

॥ द्वितीयान्विति: ॥

**प्र-५ अधोलिखितेभ्य: कयोश्चित् द्वयो: ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. देवालये गेहविधौ जलाशये राहोर्मुखं शम्भुदिशोविलोमत: ।
मीनार्क-सिंहार्क-मृगार्कतस्त्रिभे खाते मुखात् पृष्ठविदिक्शुभा भवेत् ॥

२. प्रोक्तं चतुषण्ठिकरं पृथुत्वे क्रमेण षड्भिश्च करैर्विहीनम् ।
षड्भागतो दैर्घ्यमितोऽधिकं स्यात् बलाधिपस्यैव च पञ्च वृद्धये ॥

३. एकतो यत्र तु ग्रामो नगरं चैकत: स्थितं मिश्रं तु खर्वटं नाम नदीगिरि समाश्रयम् ।
विप्राश्च विप्रभृत्याश्च यत्र चैव वसन्तिते  स तु ग्राम इति प्रोक्त: शूद्राणां वास एव च ॥

**प्र-६ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । ०८**

१. भूमौ शल्याशल्यविचारः ।

२. दुर्गनिर्माणविचारः ।

**प्र-७ अधोलिखितेषु कयोश्चित् द्वयोः टिप्पणीं लिखतु । ०४**

१. भूमौ विग्रहदृष्टिविचारः ।

२. सेनापतिभवनम् ।

३. चातुर्वर्ण्यस्य शालालिन्दयोः प्रमाणम् ।

४. द्वारवेधफलम् ।

**प्र-८ अधोलिखितेषु केषाञ्चित् पञ्चप्रश्नानामतिलघूत्तरं लिखतु । ०५**

१. काकिणीशब्दस्य कोऽर्थः ?

२. शेषनागस्य मुखं सम्मुखो भवति तर्हि फलं किम् ?

३. शेषनागस्य मुखं पृष्ठे भवति तर्हि फलं किम् ?

४. भूमिखननकाले यदि पाषाणः लभ्यते तदा फलं किम् ?

५. गृहार्थं भूमिखननकाले लौहदर्शनं भवति चेत् फलं किम् ?

६. गृहसमीपे क्षीरयुक्तवृक्षस्य रोपणे फलं किम् ?

७. ब्रह्मणो विद्धगृहस्य फलं किम् ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ अधोलिखितेभ्यः कयोश्चित् द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

१. ईशानाग्निकोणाद्वा शिलास्थाप्याः प्रदक्षिणाः । मध्ये कूर्मशिला पश्चाद्गीतवादितमङ्गलैः ॥
नन्दा पूर्वप्रदातव्या शिलाः शेषाः प्रदक्षिणाः । मध्ये च धरणी स्थाप्या यथाकर्मप्रयत्नतः ॥

२. वामाङ्गे धनवस्त्रदेवभवनं धातुश्रियोर्वाजिनः नार्यास्त्वोषः भोजनस्य भवनं स्याद्वाटिका वामतः ।
वह्ने गेजलदन्तिशस्त्रसदनं स्त्रीणां तथा दक्षिणे स्थानं महिषमाजमोर्णिकमिदं याम्याग्निमध्ये शुभम् ॥

३. यत्र तत्र स्थिता वृक्षा विल्वदाडिमकेसराः । पनसो नारिकेलश्च शुभं कुर्वन्ति नित्यशः ॥
जयन्ती दाडिमारिष्टान् परित्यज्य शमी सदा । अहि पिद्ध मलयान् वृक्षान् वास्तुमध्येन रोपयेत् ॥

**प्र-१० अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । ०८**

१. पुराणेषु वास्तुशास्त्रदृष्ट्या प्रासादमन्दिरवास्तुविचारः ।

२. पुराणेषु वास्तुशास्त्रदृष्ट्या वृक्षवास्तुविचारः ।

**प्र-११ अधोलिखितयोः कस्यचित् एकस्य उपरि टिप्पणीं लिखतु । ०२**

१. चतुष्पथे स्थितेषु भूखण्डेषु भवननिर्माणम् ।

२. पुराणेषु मण्डपानां लक्षणम् ।

**प्र-१२ अधोलिखितेभ्यः कयोश्चित् द्वयोः अतिलघूत्तरं लिखतु । ०२**

१. प्रासादशब्दस्य अर्थः कः ?

२. शिला कति विधा भवति ?

३. मत्स्यपुराणानुसारेण मण्डपानां कति लक्षणानि भवन्ति ?

४. राज्ञादिषु गृहस्य कस्मिन् भागे क्रीडनार्थं वाटिका कर्तव्या ?